# শ্রীশিবাষ্টকং ১

{॥ শ্রীশিবাষ্টকং ১ ॥}

॥ অথ শ্রী শিবাষ্টকং ॥

প্রভুং প্রাণনাথং বিভুং বিশ্বনাথং জগন্নাথনাথং সদানন্দভাজম্ ।

ভবদ্ভব্যভূতেশ্বরং ভূতনাথং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ১॥

গলে রুণ্ডমালং তনৌ সর্পজালং মহাকালকালং গণেশাধিপালম্ ।

জটাজূটগঙ্গোত্তরঙ্গৈর্বিশালং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ২॥

মুদামাকরং মণ্ডনং মণ্ডয়ন্তং মহামণ্ডলং ভস্মভূষধরংতম্ ।

অনাদিহ্যপারং মহামোহহারং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ৩॥

বটাধোনিবাসং মহাট্টাট্টহাসং মহাপাপনাশং সদাসুপ্রকাশম্ ।

গিরীশং গণেশং মহেশং সুরেশং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ৪॥

গিরিন্দ্রাত্মজাসংগ্রহীতার্ধদেহং গিরৌ সংস্থিতং সর্বদা সন্নগেহম্ ।

পরব্রহ্মব্রহ্মাদিভির্বন্ধ্যমানং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ৫॥

কপালং ত্রিশূলং করাভ্যাং দধানং পদাম্ভোজনম্রায কামং দদানম্ ।

বলীবর্দযানং সুরাণাং প্রধানং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ৬॥

*Stotram Digitalized By Sanskritdocuments.org*

শরচ্চন্দ্রগাত্রং গুণানন্দ পাত্রং ত্রিনেত্রং পবিত্রং ধনেশস্য মিত্রম্ ।

অপর্ণাকলত্রং চরিত্রং বিচিত্রং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ৭॥

হরং সর্পহারং চিতা ভূবিহারং ভবং বেদসারং সদা নির্বিকারম্ ।

শ্মশানে বদন্তং মনোজং দহন্তং শিবং শঙ্করং শম্ভুমীশানমীডে ॥ ৮॥

স্তবং যঃ প্রভাতে নরঃ শূলপাণে পঠেত্ সর্বদা ভর্গভাবানুরক্তঃ ।

স পুত্রং ধনং ধান্যমিত্রং কলত্রং বিচিত্রং সমাসাদ্য মোক্ষং প্রযাতি ॥ ৯॥

॥ ইতি শিবাষ্টকম্ ॥

Encoded NA

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shivashtakam ( Version 2 ) Lyrics in Bengali PDF
% File name : shiva8_1.itx
% Category : aShTaka
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Latest update : January 23, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website